# अभिज्ञानशाकुन्तले पर्यावरणदृष्टिः

**प्रकाशपौडेलः**
उपप्राध्यापकः
साहित्यविभागस्य
श्री-विन्दुवासिनी-संस्कृत-विद्यापीठस्य
prakash.paudel@nsu.edu.np

**सारः**

**प्रस्तुतालेखः** कालिदासप्रणीते 'अभिज्ञानशाकुन्तलम्' इति नाटके पर्यावरणदृष्टिविवेचने केन्द्रितोऽस्ति। समष्टिविधेरुपयोगेन कालिदासप्रणीताद् अभिज्ञानशाकुन्तलात् प्राथमिकस्रोतसः सामग्र्यस्तत्सम्बद्धलेखरचनाभ्यो द्वितीयकस्रोतसश्च सङ्कलिताः सामग्र्यो गुणात्मकपद्धत्या विश्लिष्य निष्कर्षिताः सन्ति। तन्निष्कर्षो वर्तते यत् - अभिज्ञानशाकुन्तले प्रकृतेर्मानवीकरणेन, मानवस्य प्रकृतीकरणेन, आलम्बनोद्दीपनोपमानवस्तुसङ्केतव्यञ्जकादिषु अनेकानेकस्वरूपेषु प्रकृतिवर्णनेन च प्रकृतिमानवयोरभेद्यः, प्रगाढश्च सम्बन्धः प्रकाशितो वर्तते, प्राकृतिकोपकरणानि मानववत् दृश्यन्ते चेत् प्रकृतौ आत्मदृष्टिरायाति, प्रकृतिविनाशाय च मानवो नोत्सहते, तेन प्रकृतिविनाशो न्यूनताङ्गच्छतीति। एवञ्च नाटके अनेकशो वृक्षाः, वनस्पतयः, पशवः, पक्षिणश्च संरक्षणीया इति चेतना जागरिता प्राप्यते, प्रकृतेरधिकदोहनं विनैव सुखमयं सुन्दरञ्च जीवनं जीवितुं शक्यते, **न जातु कामः कामानामुपभोगेन शाम्यति** इति पौरस्त्यदर्शननिर्देशितं मानवजीवनं सुखेनाग्रे नेतुं यदतीवावश्यकं तदेव प्रकृतितः ग्रहणीयम्, अधिकाधिकसुखेच्छया प्रकृतेरत्यधिकदोहनं क्रियते चेत्तद्विनाशायैव भवति, एतेन सततसुखलाभो मृगतृष्णायां प्रणयभाव एव भविष्यति, प्रकृतिरक्षणे नार्यः पुरुषेभ्योऽधिकसचेष्टा भवन्ति, संरक्षिता प्रकृतिरपि चेतनानचेतनान् सर्वानपि रक्षति, मानवः प्रकृतिसंरक्षणसंवर्धनेनैव जीवश्रेष्ठो भविता, शासकैः पर्यावरणसंरक्षणसंवर्धनादिना सततविकासं विधाय प्रकृतिहिताय सदा यतनीयमित्यादयः पर्यावरणसंरक्षणसम्बद्धा विचाराः, मान्यताश्च प्रस्तुता लभ्यन्ते, नाटकीये प्रकृतिचित्रणे, तपोवनवर्णने, वस्तुविस्तारे च पर्यावरणदृष्टिर्मुखरिता वर्तते, अत नाटकमिदं पर्यावरणीयचेतनादृष्ट्या समुल्लेखनीयमस्तीति च निष्कर्षितमस्ति। एतन्निष्कर्षः सम्बद्धविषयकाणां विद्यार्थिनां जिज्ञासूनाञ्चोपयोगी भविष्यतीत्यपेक्षितमस्ति।

**शब्दकुञ्जी** : पर्यावरणम्, प्रकृतिप्रेम, विनाशः, वृक्षसेचनम्, संरक्षणचेतना।

## आमुखम्

**ॐ द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।**
**वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥**

वाङ्मयोत्पत्तेः प्रारम्भादेव संस्कृते पर्यावरणीयचिन्तनस्य जागरणमुपलभ्यते। पर्यावरणेन सह अन्तरिक्षमपि संरक्षणीयमिति मान्यता आवैदिककालादेव कविभिः परिपोषिता वर्तते। वैदिककालोत्तरोद्भवेषु पुराणेषु स्मृतिशास्त्रेषु च नदी-सरोवर-तडाग-कूपादीनां भूतपदार्थानाम्, वृक्ष-लतादिवनस्पतीनाम्, पशुपक्ष्यादिजीवानाञ्च विनाशः पापाय भवतीति समुल्लिख्य पर्यावरणरक्षायै जननियोजनं पर्यावरणसञ्चेतनायाः संरक्षणतत्परतायाश्च परमादर्श एव। संस्कृतवाङ्मये धर्मशास्त्रादिवत् साहित्येऽपि पर्यावरणचेतना सम्यक् निर्व्यूढा लक्ष्यते। अत एव काव्यलक्षणग्रन्थेषु

सन्ध्या, सूर्यः, चन्द्रः, रात्रिः, प्रदोषः, अन्धकारः, वासराः, प्रातः, मध्याह्नम्, पर्वताः, ऋतवः, वनानि, सागराश्चेत्यादीनि प्राकृतिकपर्यावरणोपकरणानि, संयोगः, वियोगः, मुनिः, स्वर्गः, पुरम्, यज्ञः, युद्धम्, यात्रा, विवाहः, मन्त्रणा, सन्तानोत्पादनञ्चेत्यादीनि सामाजिकपर्यावरणानि च कविभिर्वर्णयितव्यानीति निर्देशोपलभ्यते। काव्यलक्षणग्रन्थेषु निबद्धा इयं मान्यता वाल्मीकिः, व्यासः, कालिदासः, भारविः, माघः, भवभूतिः, बाणभट्टः, दण्डी, सुबन्धुश्चेत्यादीनां कवीनां रचनासु समुपन्यस्तैर्भावकसम्मोहकैश्चारुवर्णनैरनुप्राणितमुपलभ्यते।

कालिदासः ईशवीयप्रथमशतकात् पूर्वं जातः 'कविकुलगुरुः' इति नाम्ना सुविख्यातो महान् कविरस्ति। अनेन 'रघुवंशः', 'कुमारसम्भवम्' चेति द्वे महाकाव्ये, 'मेघदूतम्', 'ऋतुसंहारः' चेति द्वे खण्डकाव्ये, 'विक्रमोर्वशीयम्', 'मालविकाग्निमित्रम्', 'अभिज्ञानशाकुन्तलम्' चेति त्रीणि नाटकानि चेति सप्त रचनाः प्रणीताः सन्तीति मन्यते। काव्ये मनोहारिण्याः प्रकृतेः सूक्ष्मातिसूक्ष्ममनोभावानाञ्च चित्राङ्कने एवञ्चोपमाप्रयोगे तत्प्रतिभा बहुप्रसस्ता वर्तते। प्रकृतिसौरभवर्णनेन साकमेतस्य काव्येषु गभीरं प्रकृतिप्रेम, प्रकृतिमानवयोरन्तराबद्धता, प्रकृतिः संरक्षणीया इति सन्देशश्चोपलभ्यते। 'अभिज्ञानशाकुन्तले' नाट्यकलाकाव्यकले इव प्रकृतिसंरक्षणचेतना च आधिक्येन मुखरिता लभ्यते। अस्य नाटकस्य पर्यावरणीयं पठनं मानवसंशोधितपर्यावरणमाधृत्य च विधातुं शक्यते। प्रस्तुतालेखे तु तत्र प्रस्तुता मानवेनासंशोधितपर्यावरणसम्बद्धा चेतना वर्णिता विश्लेषिता च वर्तते इत्यस्यालेखस्य सीमा वर्तते।

## अध्ययनविधिः

'अभिज्ञानशाकुन्तल'नाटके निरूपितायाः पर्यावरणचेतनाया विश्लेषणाधारितं प्रस्तुतमध्ययनं गुणात्मकं वर्तते। अतोऽत्र नाटकीयपाठोपलब्धानां पर्यावरणीयचेतनाभरितविषयाणां वर्णनं विश्लेषणञ्च कृतमस्ति। प्रचलितेषु निदर्शनचयनविधिषु समष्टिविधेरुपयोगेन महाकविना कालिदासेन ईशवीयप्रथमशतकपूर्वं विरचितं समस्तमपि 'अभिज्ञानशाकुन्तल'नाटकं चितमस्ति। तस्य बहुलपाठेषु च २०११ तमे ईशवीयाब्दे चौखम्बाकृष्णदासअकादमीब् तः प्रकाशितग्रन्थे स्थितः पाठो विश्लेषणे प्रयुक्तोऽस्ति। तथ्यानि 'अभिज्ञानशाकुन्तला'त् तन्नाटकसम्बद्धपुस्तकपत् रिकालेखरचनादिभ्यश्च गृहीतानि विद्यन्ते। तानि वर्णनात्मकविश्लेषणात्मकविधिना विश्लिष्य निष्कर्षे प्रापितानि सन्ति।

## सैद्धान्तिकाधारः

गोवलये सर्वतः व्याप्ताः सर्वेऽपि प्राकृतिकपदार्थाः, जीवाः, समाजसंस्कृत्यादिमानवनिर्मितयश्च पर्यावरणे परिगण्यन्ते। 'परि' इति उपसर्गकात् वरणार्थकात् 'वृञ्'धातोः ल्युटि पर्यावरणशब्दो निष्पद्यते। एतेन 'चतुरश्रपरिवृतम्' इत्यर्थो ज्ञायते। सामान्यतः भाषिकव्यवहारे वातावरणपर्यावरणशब्दौ पर्यायवाचकौ मन्येते। किन्तु अधुना नेपालीहिन्द्यादिभाषासु पर्यावरणशब्दो वातावरणशब्दबोध्यार्थतः पृथगर्थे प्रयुज्यते। समकालिकैः संस्कृतसाधकैर्वर्तमानकाले पर्यावरणशब्दगम्यं किमिति यथा प्रस्तुतमुपलभ्यते -

भूमिर्जलं नभो वायुरन्तरिक्षं पशुस्तृणम्।
साम्यं स्वस्थत्वमेतेषां पर्यावरणसंज्ञकम्॥ (सिंह, ई. २०२४, ७१) इति।

प्रकृतौ स्वतःसम्भवानां मानवनिर्मातानाञ्च वस्तूनां मानवीयपरम्परायाः मान्यतायाश्च संयुक्तस्वरूपं पर्यावरणमुच्यते। पारिस्थितिकतन्त्रे सन्तुलनसम्बद्धविचाराः मान्यताश्च पर्यावरणाभियाने पर्यावरणशब्दस्यार्थे

परिगण्यन्ते । पर्यावरणशब्दगम्योऽयमर्थोऽधुना अर्थान्तरं प्राप्य पाश्चात्त्यसाहित्ये प्रचलितस्य 'इकोलोजि' इति शब्दगम्यार्थे विपरिणतोऽति। विंशशतके प्रचलिता प्रकृतिसंरक्षणसम्बद्धा सा मान्यता इदानीं भारतवर्षीयासु भाषासु पर्यावरणशब्देन बुध्यते । प्रकृतेः सर्वोपरि महत्त्वख्यापनम्, प्रकृतिं विना मानवास्तित्वं नेति चिन्तनम्, प्रकृतेः प्राणीनाञ्च सामञ्जस्यं भवेदित्याग्रहेण वित्तवादस्यालोचनञ्चेति पर्यावरणीयमान्यतायाः प्रमुखमान्यताः सन्ति । पाश्यात्त्यजगति प्रयुक्तस्य 'इकोलोजी'शब्दस्य समानार्थकतया आधुनिकीषु आर्यभाषासु पर्यावरणम्, परिवृत्तम्, पारिस्थितिकी, परिस्थितिविज्ञानञ्चेति शब्दाः प्रयुक्ता लभ्यन्ते (एटम, २०७६, पृ. ३११) । पाश्चात्यदेशे प्राथम्येन 'इकोलोजि'शब्दस्य प्रयोगः जर्मनदेशीयेन वैज्ञानिकेन 'अर्नेष्टहिकेल' इत्यनेन १८६६ तमे ईशवीयाब्दे व्यधायि (क्षेत्री, २०८१) । अयं 'ग्रिक'भाषायाः 'ओइकस्' इति शब्दे 'लोजी'रूपे विपरिणतस्य 'लोगोस्'शब्दस्य संयोगात् निर्मितो वर्तते । 'ओइकस्'शब्दः गृहं निवासो वा बोधयति चेत् 'लोगोस्'शब्दस्यार्थः अध्ययनम्, अनुसन्धानम्, परिचर्चा, चर्चा चेति भवति । एतेन 'इकोलोजि' इत्यस्य यौगिकार्थः वासस्थानविषयीकृतमध्ययनम्, अनुसन्धानम्, परिचर्चा वा निष्पद्यते । हिकेलेन पृथ्वीं समेसां प्राणीनां निवासस्थलीं मत्वा पर्यावरणजीवयोः सम्बन्धाध्ययनं कर्तुमभिलषित आसीत् । विंशशतकस्य पूर्वार्धपर्यन्तं पर्यावरणाध्ययनं जीवविज्ञानान्तरितमवर्तत । तस्य प्रमुखोद्देश्यञ्च पर्यावरणजीवनयोः पारस्परिकसम्बन्धाध्ययनमासीत् । १९६० ईशवीयाब्दपश्चात् पर्यावरणचिन्तने गभीरता समेधिता (गिरी, ई. २०२५) । तदनु चिन्तनमिदं राजनीतिकसामाजिकाभियानरूपं गृहीत्वा उत्तरोत्तरेण विकसितोऽभूत् । अन्तरे तत्सम्बद्धा विविधा मान्यताः दृष्टयश्च प्रस्तुताः । ताभिः मान्यताभिः अभियानानि च निर्देशितानि जातानि । सिद्धान्तान्तरसम्पर्केण पर्यावरणीयमभियानञ्च बहुविधो जातः । तस्मिन्नेवोपक्रमे गहनपर्यावरणम्, पर्यावरणीयः नारीवादः, तृतीयविश्वपर्यावरणवादः, पर्यावरणीयो मार्क्सवादः, पर्यावरणसम्बद्धा मार्क्सवादस्य दृष्टिश्चेति मान्यता विकसिताः सन्ति (वैद्य, २०७८) । एता मान्यताः पर्यावरणीयकाव्यसिद्धान्तनिर्मितौ प्रमुखाधाररूपेण स्थिताः सन्ति ।

पर्यावरणसंरक्षणचेतनां पर्यवरणविनाशोत्पन्नां समस्यां च लक्षीकृत्य साहित्यसर्जनस्यारम्भोऽभूत् । रचेलकार्नासरचिता 'द साइलेन्ट स्प्रिङ' (मौनो वसन्तः) इति शीर्षकयुता कथा पर्यावरणीयसाहित्यस्य प्रथमा रचना विद्यते । तत्र कीटनाशकविषादेः अत्यधिकोपयोगः पर्यावरणे प्रातिकूल्यमानयतीति प्रतिपादिता वर्तते (क्षेत्री, २०८१) । रचेलप्रणीतपर्याकथानन्तरमपि क्रमेण पर्यावरणीयाभियानेन प्रभावितस्य साहित्यस्य नैरन्तर्येण विकासः जातः । ततः सा परम्परा विश्वस्यानेकासु भाषासु विस्तीर्णा अभवत् । तेन सहैव साहित्ये पर्यावरणीया चेतना कथमभिव्यक्ता वर्तते इति विश्लेषणसिद्धान्तरूपेण पर्यावरणीयः काव्यसिद्धान्तश्च विकसितः । इदं काव्यलक्षणशास्त्रं पर्यावरणीया समालोचना, पर्यावरणीयसाहित्याध्ययनम्, हरितसाहित्याध्ययनम्, हरितसांस्कृतिकाध्ययनम्, पर्यावरणोन्मुखा समालोचना च कथ्यते । एतस्मिन् काव्यशास्त्रे प्राकृतिकसंसारमानवसंसारयोः सम्बन्धः साहित्ये कथमभिव्यक्तोऽस्तीति अधीयते (भट्टराई, २०७०, पृ. ८१) । एकपक्षतः पर्यावरणीया समालोचना पर्यावरणीयं चिन्तनं केन्द्रीकृत्य विहितं साहित्याध्ययनं वर्तते । अपरतस्तु पर्यावरणरक्षणसंवर्धनभूमिकायाः, तद्विषयीकृतस्य चिन्तनस्य च साहित्यिकाव्यक्तेर्गवेषणा वर्तते (गिरी, ई. २०२५) । पर्यावरणीये साहित्यशास्त्रे प्रकृतिमानवयोः सम्बन्धः, मानवमानवेतरयोः प्राणिनोः पारस्परिकः सम्बन्धः, मानवक्रियाभिः प्रकृतौ जातः प्रभावः, प्रकृतिसम्बद्धा मानवीया धारणा दृष्टिश्च, समाजव्यवस्था, आधुनिकता, औद्योगिकीकरणम्, नगरीकरणम्, उपभोक्तृवादः, भूमण्डलीकरणम्, विज्ञानप्रविधेः विकासविस्तारौ चेत्यादिकारणैः पर्यावरणे जाता क्षतिः प्रकटीक्रियते । तथैव पर्यावरणरक्षणविरुद्धस्य

चिन्तनस्य प्रतिवादः, प्रकृतिप्रेम, पर्यावरणरक्षणाभियानानि, पर्यावरणसम्बद्धा विचाराश्चेति विषयाः पर्यावरणीयसमालोचनया प्रत्यक्षसम्बद्धा मान्यताः सन्ति । पर्यावरणीयमध्ययनं पर्यावरणीयाभियानेन सह संयुक्तं भवितव्यमिति च मन्यते ।

'वीरभोग्या वसुन्धरा' इति मन्यमानैर्मानवैर्धराया बलात् दोहनप्रवृत्त्या पर्यावरणमातङ्कितमस्ति । प्रकृतेर्वि़िनाशे मानवस्य भौतिकसुखलिप्सा एव कारणीभूता । प्राकृतिकसंसाधनानि शून्योन्मुखानि कृत्वा तेषामतिशयेन दोहनम्, रिक्तप्रायान् विधाय नदीपुष्करिणीसागरादिभ्यो मत्स्यग्रहणम्, वन्यपक्षिणो मारणेन समापनम्, मृगयया पशुहननम्, खनिकर्षणेन भूस्खलनमानयनम्, वनं विनश्यन् शून्यीकरणञ्चेत्यादयो मानवक्रियाः चिन्तोत्पादिकाः सन्ति । एताभिः पारिस्थितिकीतन्त्रे गभीरा क्षतिर्जाता वर्तते । पर्यावरणसमालोचना प्राधान्येन कृतौ वातावरणविनाशोऽभिव्यक्तोऽस्ति न वा वातावरणसंरक्षणविषये चिन्ता, अभिरुचिश्च प्रकटिता न वेत्यादिकान् प्रश्नान् संवहति (सोती, ई. २०२४ पृ. १०२) । पर्यावरणीयनारीवादे प्रकृतिं नारीं च परस्परं सम्बद्धां मत्वा तयोः समस्याः प्रस्तूयन्ते । प्रकृतिर्नारीपरका, संस्कृतिः पुरुषपरका भवतीति धारणा पर्यावरणीयनारीवदे लभ्यते । पितृसत्तया उभे सममुत्पीडिते स्तः द्वयोरुपरि दमनं निरन्तरं वर्तते इति च मन्यते । वित्तवादनिर्मितया पुरुषवादीमनोभावनया प्रकृतिः दमिता वर्तते (अर्याल, २०७९ पृ. ८४) प्राणीहिंसायाः विरोधः, प्रकृतौ मातृवत् दृष्टिः, नारीणां ज्ञाने महत्त्वाधानम्, शक्तौ शरीरे कामुकतायाञ्च वैधताधानम्, मानवामानवौ प्रकृतिसम्बद्धौ इति विचारश्च पर्यावरणीयनारीवादस्य प्रमुखविचाराः सन्ति ।

पर्यावरणसाहित्ये पर्यावरणविरुद्धाचारस्य सिद्धान्तस्य व्यवहारस्य च विरोधो भवति । साम्प्रतिकपर्यावरणसमस्याः प्राधान्येन प्रस्तूयन्ते । विशेषतस्तत्र वित्तवादपरिपोषणाय वस्तूनामधिकोत्पादनाय वितीर्यार्थसञ्चयाय च सञ्चालितैरुद्योगैर्यातायातसाधनैरपि ओजोनस्तरविदारणात् विनाशकारिणी परावैजनी सूर्यरश्मिः पृथिव्यामागच्छन्ती वर्तते । एतेन पृथिवीवासिनः सर्वे मृत्यून्मुखाः सन्ति । जलवायुपरिवर्तनेन मेरुप्रादेशिकं तुहिनं द्रवीभूय पृथ्व्येव जलनिमग्ना भवति किम् अथवा हिमालयाः कालपाषाणेषु रूपान्तरिताः सन्तः हिमनद्यो विलुप्यन्ते किमिति विभीषिका जनमनसि नरीनृत्यन्ती वर्तते इत्यादयः पारिस्थितिकतन्त्रसम्बद्धा विषयाश्चात्र प्रस्तूयन्ते । एवमेव जलाभावेन कृषिः परिक्षयमाणा वर्तते । जलमूलानि शुष्कतामाप्नुवन्ति सन्ति । जलप्रदूषणं परिवर्धमानं दृश्यते । वायुमण्डलं सूक्ष्मातिसूक्ष्मतमैर्धूलिकणैः प्रदूषितमस्ति । एतेन न केवलं जनजीवनम्, अपितु चराचरप्राणिनश्च भृशं पीडिताः सन्तीति च पर्यावरणसमालोचनाया मान्यताः सन्ति । एतासां सर्वासामपि समस्यानां कारणं मानवस्य सुखलिप्सोपभोक्तृवादौ स्तः । समस्योद्भवे मानवेतरप्राणिनां भूमिका न, तथापि ते प्रकृतिमानवयोर्द्वन्द्वेन पीड्यमानाः सन्ति । मानवः प्राणिषु श्रेष्ठो वर्तते । जीवश्रेष्ठस्य मानवस्य कृते पशूनामधिकारोच्छेदः, अतिचारेण स्वार्थसन्धानं मा वरम् । जीवो वा जडो वा स्यात्, पृथिव्यां स्थितानां समेषां संरक्षणं जीवश्रेष्ठस्य मानवस्य परमकर्तव्यं वर्तते । अविवेकदूषितो मानवः स्वार्थरक्षायै विज्ञानस्य प्रविधेश्च नाम्ना विपदामानयने प्रवृत्तो लभ्यते । मानवीयेन स्च्छन्दाचारेण पारिस्थितिकतन्त्रे विघ्नमुत्पाद्य विक्षोभितां प्रकृतिं शान्त्वनाय मानव एव प्रभवति । प्रकृतिसंरक्षणसम्बद्धमेनमादर्शं पर्यावरणीये साहित्ये प्राधान्येन प्रस्तुतमुपलभ्यते ।

## विमर्शपरिणामौ

पर्यावरणीया समालोचना विंशशतकोद्भवा काव्यमान्यता वर्तते । महाकविः कालिदास ईशवीयप्रथमशतके आसीत्

इति मन्यते । महाकविना 'अभिज्ञानशाकुन्तल'नाटकप्रणयनात् पर्यावरणीयसमालोचनाया विकासपर्यन्तं द्विसहस्राधिकानि वर्षाणि व्यतीतानि सन्ति। कृतिरियं पर्यावरणीयविज्ञानं केन्द्रीकृत्य रचिता न, तथाप्यत्र पर्यावरणी- या मान्याता मुखरिता लभ्यन्ते । अधुना पर्यावरणसंरक्षणाभियानस्य तत्सम्बद्धकाव्यप्रणयनपरम्पराया आविर्भावे विकासे च पाश्चात्त्यविदुषां योगदानवार्ता विश्वव्याप्ता वर्तते। आवैदिककालाद् आर्यावर्तभूमौ पर्यावरणमैत्री चेतना निरन्तरं प्रवहन्ती आसीत्। 'ऋग्वेदे' वृक्षाः समूलं नोच्छेदनीयाः, ते पशुवृक्षादिजीवशरण्याः वर्तन्ते इति निगदितमु- पलभ्यते (ऋग्वेदः, ६/४८/१७, वेद.*com*)। वाल्मीकिव्यासादिभिश्च काव्येषु मानवसम्मोहिका प्रकृतिः प्राधान्येन चित्रिता। कार्यमिदं प्रकृतेर्महत्त्वख्यापकं किल। कालिदासस्तु मनोहारिण्याः प्रकृतेः सुन्दरस्वरूपाङ्कने लब्धप्रतिष्ठो मन्यते। आलम्बनीकृत्य, उपमानीकृत्य, उद्दीपनीकृत्य च चित्रिता प्रकृतिस्तत्प्रणीतेषु काव्येषु दरीदृश्यते एव। एवमेव प्रकृतेर्मानवीकरणेन, मानवस्य प्रकृतीकरणेन च प्रकृतिमानवयोरभेद्यसम्बन्धप्रकाशनमेतस्यापरं वैशिष्ट्यं विद्यते । तदन्यतोऽप्याधिक्येन कवेः प्रौढतमकृतौ 'अभिज्ञानशाकुन्तले' प्रकटीकृतमुपलभ्यते । तत्र लतावृक्षपशुपक्ष्यादिषु मानवक्रियाः, भावाः, चेष्टाः, कल्पनाः, संवेदनाश्च यथाऽऽरोपिताः सन्ति, ताभिः तिर्यञ्चः, वनस्पतयः, पशवः, पक्षिणश्च मानवायन्ते । मृगव्यापादनावरोधः, प्रकृतिक्रोडे परिवर्धितायां नायिकायां सौन्दर्यातिशयावलोकनम्, तपोवननिवासिनां हृदयस्थो लतावृक्षपशुपक्ष्यादिषु सहोदरस्नेहः, तेषु सजीवत्वप्रकल्पना चेत्यादीनि नाट्यवस्तूनि प्रकृतेः गभीरप्रेम्णा संरक्षणचेतनया च आप्लावितानि सन्ति। तस्मात् नाटकेऽस्मिन् प्रस्तुतां पर्यावरणदृष्टिं समुद्घाटयितुं प्रस्तुतालेखो विनिर्मितो वर्तते। आलेखे नाट्यस्य पर्यावरणीयपठनं कृत्वा तत्र पर्यावरणदृष्टिर्नाटके कुत्र कथञ्च प्र- स्तुता वर्तते इति विविधशीर्षकोपशीर्षकेषु विभज्य वर्ण्यते।

**प्रकृतिमानवयोः सम्बन्धः**

प्रकृतिमानवयोः सम्बन्धं सन्दर्शयितुं प्रकृतौ चेतनधर्मारोपेण संवेदनशक्तेर्विन्यासेन च शाकुन्तले मानवप्रस- कृत्योर्गभीरः सम्बन्धः प्रकटीकृतो वर्तते। तत्र मानवीकृता प्रकृतिर्भावनशीला, सहानुभूतिमती च वर्तते (सोनकर, ई. २०१८ पृ. १७१२) नाटकस्य चतुर्थाङ्के यदा नायिका शकुन्तला पतिगृहं प्रति निर्गच्छन्ती भवति, तदा समस्ता तपोवनप्रकृतिर्वियोगाकूला दृश्यते। यथा -

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी।
अपसृतपाण्डुपत्रा मुञ्चन्ति अश्रु इव लताः ॥ (अभि. , ४/१४) इति।

कण्वमुखात् शकुन्तला इतो निर्गच्छन्ती वर्तते इति समाकर्ण्य मयूरी नर्तितुं त्यक्त्वा शोकं प्रकटीकरोति, भक्ष्यमाणान् कुशखण्डान् मुखाद् विकीरन्त्यो हरिण्यो शकुन्तलां निर्निमेषं पश्यन्ति, पीतपर्णाश्रूणि मुञ्चन्त्यो लताः क्रन्दन्ति। एवमेव वनज्योत्स्ना शाखाहस्तैस्तपोवनान्निगच्छन्तीं शकुन्तलामालिङ्गितुमिच्छति, मृगशावकश्च वसे- नान्ते संसज्ज्य तपोवनान्निर्गच्छन्तीं तां निरोद्धुमिच्छति । वनस्पतीनाम्, वन्यजन्तूनाम्, पक्षिणाञ्च एताः क्रिया मानवीयां शारीरिकीं वृत्तिं मानसिकीं स्थितिञ्च प्रकटीकुर्वन्ति। नाटके सचेतनाचेतनयोरन्तःसम्बन्धः, आत्मभावः, गभीरा प्रीतिः, पारस्परिककल्याणभावश्च प्रगाढो दृश्यते (पाण्डेय, ई. २०२० पृ. १७९५) । शकुन्तला पितरं कण्वमुद्दिश्य ब्रूते "तात एषा उटजपर्यन्तचारिणी गर्भभारमन्थरा मृगवधूर्यदा सुखप्रसवा भविष्यति, तदा मे कमपि प्रियनिवेदकं विसर्जयिष्यसि" (कालिदासः, ई. २०१३ पृ. २९२)। अत्र कालिदासेन पशुं प्रति प्रेमभावो दर्शितो वर्तते। नाटके अभिज्ञानदर्शनोत्पन्नस्मृतिमतः शकुन्तलावियोगाकूलस्य नायकस्य दुष्यन्तस्य शोके प्रकृतिरपि शोकमग्ना

दृश्यते। आम्रवृक्षः पुष्परजोत्पादने विलम्बनेन, कुरुवकं दीर्घकालपर्यन्तं कलिकाधारणेन, कोकिलश्च वसन्तकाले रुताभावेन च वसन्तागमे च प्रसन्नतां न प्रकटयन्ति (६/३) । शकुन्तलावियोगजनिते दुस्यन्तशोके प्राकृतिकवस्तुभिर्मानवसंवेदनामवगत्य तदनुरूपः व्यवहारो दर्शितो वर्तते। इत्थमत्र प्रकृतिर्भावनशीला साधिता वर्तते। एतेन भावनायुक्ता प्रकृतिर्यथा मानवसहृदया, सहानुभूतिमती च वर्तते, तथा मानवेनाऽपि तां प्रति तथैव व्यवहरणीयमिति सन्देशः प्रस्तुतो वर्तते।

नाटके मानवस्य प्रकृतीकरणेन च तस्य प्रकृत्या सह गभीराबद्धता प्रदर्शिता वर्तते । शकुन्तलायाः शरीरलावण्यं ख्यापयितुं तल्लावण्यं यथा प्रकृतीकृत्य प्रस्तुतमस्ति -

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥ (१/२२) इति।

अत्र नायिकायाः शकुन्तलाया अधरोष्ठः, हस्तौ, यौवनञ्च क्रमात् किसलयरागेण, कोमलपल्लवेन, कुसुमेन च तुल्यानि निर्दिश्य तां वासन्तिकविटपी संसाधितो वर्तते । तरोरभेदस्वरूपवर्णनेन मानवकन्या साधु प्रकृतीकृता उपलभ्यते। तथैव नाटकस्य सप्तमाङ्के सङ्ज्ञानानन्तरं पुनर्मिलितां शकुन्तलामुद्दिश्य दुश्यन्तः कथयति - "तेन हि ऋतुसमागमचिह्नं प्रतिपद्यतां लताकुसुमम्" (पृ. ५८८) इति। संवादांशेऽस्मिन्नपि मुनिकन्या शकुन्तला लता निर्दिश्य प्रकृतीकृता वर्तते। सप्तमाङ्के वल्मीकावृतः, सर्पत्वग्धृतः, जीर्णलताकीर्णः, शकुन्तैर्नीडनिर्मितः, निदाघातिशये च निश्चलो मारीचमुनेर्देहः स्थाणुतुल्यो वर्तते इति वर्णनेन प्रकृतीकृत्य प्रस्तुतो वर्तते (७/११) । एतावता कविना कालिदासेन मानवप्रकृत्योरभेद्यं सम्बन्धं दर्शयित्वा प्रकृतिप्रेम मानवप्रेम एव इति सन्देशः प्रदत्तो वर्तते। कालिदासेन नाटकस्य नान्दीपाठे भगवतः शिवस्य अष्टमूर्तयः प्रकृतीकृत्य प्रस्तुताः सन्ति - जलम्, अग्निः, यजमानः, सूर्यः, चन्द्रः, आकाशः, पृथ्वी, वायुश्चेति (१/१) । पशुपतीति नामान्तरीयस्य भगवतः शिवस्य प्रकृतीकरणमत्र लभ्यते। अष्टमूर्तिषु सप्त प्रकृतेरङ्गानि वर्तन्ते। एतेन ईशः प्रकृतिमयः संसाधितो वर्तते (प्रजापत, ई. २०२२ पृ. २९)। भगवान् शिवः यथा करुणामयस्तथा भीमरूपश्च। अतः स रुद्रः संहारकर्ता च भण्यते। प्रकृतिरक्षकाणां शरण्यः स तन्नाशकानां रोगव्याधादिभिर्विविधविनाशविकारादिभिश्च महाप्रलयं सृजति (सिंह, ई. २०२० पृ. १५०) एवञ्च यथा अष्टमूर्तिधरः शिवो वन्द्यस्तथा शिवस्याष्टतनुरूपा विपुला प्रकृतिरपि वन्द्या वर्तते । क्रुद्धा देवा यथा शपन्ति, तथा विक्षुब्धा प्रकृतिरपि भूस्खलनजलावर्तन्यूनाधिकवर्षणादिना दण्डयति। प्रसादिता देवा यथा मानवेभ्यो वरं ददति, तथा संरक्षिता सौम्या च प्रकृतिरपि संभरणसुपोषणादिना जनजीवनं संरक्षति । अतो महाकवेः कालिदासस्य प्रकृतौ देवदर्शनं परिवृत्तीयमान्यतया सर्वतोऽनुगुणमेव वर्तते।

कविना प्रस्तुतनाटके पशुपतेः शिवस्य, ऋषेः, मुनिकन्यकायाः शकुन्तलायाश्च प्रकृतीकरणेन ज्ञानिनः, तत्त्ववेत्तारः, स्त्रियश्च आत्मभावेन सर्वान् पश्यन्ति तथा व्यवहरन्ति चेति सन्दिष्टमस्ति। आत्मवत् सर्वाणि भूतानि ईक्ष्यन्ते चेत् प्रकृत्यामवस्थिताः सर्वे प्राणिनः, भूतपदार्थाश्च प्रियतराः सम्पद्यन्ते। तेन पारिस्थितिकतन्त्रभञ्जने मानवो नोत्सहते इत्ययमादर्शः पर्यावरणीयसिद्धान्तानुकूल एव दृश्यते।

**प्रकृतिप्रेम**

पर्यावरणीयाध्ययने प्रकृतिमानवयोः सम्बन्धः, मनुष्यमानवेतरप्राणिनोः सम्बन्धः, मानवक्रियाकलापैः प्रकृतौ जातः प्रभावश्चेत्यादिभिः सह काव्ये प्रकृतिप्रेम च कथं प्रस्तुतमस्तीति विवेचनं विश्लेषणञ्च क्रियते।

'अभिज्ञानशाकुन्तलम्' प्रकृतिप्रेमदृष्ट्या च समुल्लेखनीयं दृश्यते । अत्र तपोवनोद्भवेषु विशेषरागः, तपोवनप्रकृतेः सुरम्यचित्रणञ्च प्रकृतिप्रेमनिदर्शने स्तः । नायको राजसदनस्त्रीणां सौन्दर्यात् शकुन्तलायाः सौन्दर्यमधिकं वर्तते इति बोधनाय मानवनिर्मितोद्यानादपि प्राकृतिकोद्यानं सुन्दरं भवतीति कथयति -

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ (१/१७) इति ।

इत्थं प्रस्तुतनाटके मानवसृष्टेः प्रकृतिसम्भवानि वस्तून्याधिक्येन मनोहराणि भवन्तीति प्रस्तूय प्रकृतिं प्रति मोहः प्रकटीकृतो वर्तते । एवमेव प्रकृतौ आत्मभाव इत्थं प्रस्तुत उपलभ्यते -

प्रियंवदा - त्वया समीपस्थितया लतासनाथ इव अयं चूतवृक्ष प्रतिभाति ।

शकुन्तला- तत आत्मानमपि विस्मरिष्यामि [लतामुपेत्य अवलोक्य च] हला रमणीयः खलु कालः अस्य पादपमिथुनस्य रतिकरः संवृत्तः (पृ. ५४) इति ।

'अभिज्ञानशाकुन्तले' सुरम्या, सौम्या, सुमधुरा च प्रकृतिश्चित्रिता वर्तते । मानवजीवनं सुखमयं समुन्नतञ्च निर्मातुं विविधाः वनस्पतयः, पर्वताः, नद्यः, तपोवनस्यानेकव्यवहाराश्च महत्त्वपूर्णां भूमिकां निर्वहन्ति । नाटके गङ्गानद्याः, उपत्यकायाः, भूखण्डे स्थितस्य तपोवनस्य च मनोहरं चित्रणमुपलभ्यते । सघनेन वनप्रान्तेन भरितायामस्यां भूमौ इदानीं तु क्वचित् क्वचिदेव वनमवशिष्टमस्ति । कालिदासस्य समये भूरियं विस्तीर्णैः सघनैश्च महारण्यैर्व्याप्ता अविद्यत । समाजे प्रभावशालिनो मुनयो वने साधनायां रमन्ते स्म । ऋषिकुलानि गुरुकुलानि च वन्यप्रदेशे एव आसन् । ऋषयः लतावृक्षादीनां वन्यसत्वानां पक्षिणाञ्च संरक्षणं कुर्वन्ति स्म । 'अभिज्ञानशाकुन्तल'स्य प्रथमाङ्के कण्वतपोवनस्थानि प्राकृतिकदृश्यानि तात्कालिकीं पर्यावरणस्य स्वाभाविकीमवस्थितिं जनयन्ति -

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दलेखाङ्किताः ॥ (१/१४) इति ।

कण्वतपोवनं सत्त्वमैत्री वर्तते । तत्र शुकाः नीवारभक्षणैः विघ्नमुत्पादयन्तीति हेतोर्नैव निहता सन्ति । तेषां जालबन्धनयत्नश्च न भवति । ते स्वेचछया स्वैरं वने विहरन्ति यथेच्छं नीवारान् भक्षयन्ति । अत एव वृक्षकोटराधोभागानि नीवारकीर्णानि लभ्यन्ते, मुनयः जीवनाय यदावश्यकं तद् गृह्णन्ति किन्तु उपभोग्यवस्तुग्रहणेन वन्यपदार्थे तादृशी क्षतिर्न दृश्यते, पर्यावरणप्रतिकूलता न विद्यते । इङ्गुदीफलविदारणेन वृक्षेषु प्रस्तरेषु च प्रातिकूल्यं नावलोक्यते, मृगा मानवपदचापं श्रुत्वा नैव पलायन्ते । त एतावद् विश्वस्ता सन्ति यद्- जनान् समीपागतान् ज्ञात्वाऽपि गतिभेदं न रचयन्ति । जनविश्वासातिशयात् ते 'जना मह्यं न किमपि क्षतिं प्रापयन्ति, ते तु मत्सहृदया एव सन्ति' इति मत्वा मानवसमीपे एव चरन्ति । यथा चोक्तम्-

नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ॥ (१/१५)

आरण्यकानां कृते वृक्षाः प्रियतरा विद्यन्ते स्म । ते वृक्षतलेषु आलवालं निर्माय जलं स्थापयन्ति स्म । प्रत्येकं तरुतले निर्मिताया लघुपुष्करिण्या जलं सञ्चाल्य पवनः वृक्षमूलानि प्रक्षालयति स्म । एतस्मिन् तपोवनस्थदृश्यवर्णने मुनीनां वनस्पतिवन्यजन्तुपक्षीषु प्रेमातिशयश्चित्रितो विलोक्यते । मृगयायै वनं सम्प्राप्तः सर्वशक्तिमान् राजा दुष्यन्तश्च

आश्रममृगोऽयमिति श्रुत्वैव शरं प्रतिसंहरति (पृ. २८), सैन्यं रथञ्च बहिरेव संस्थाप्यान्तः प्रविशति (पृ. ३९)। एतेन पुराकाले च प्रकृतिसंरक्षणाय मृगयाक्षेत्रस्य, संरक्षितक्षेत्रस्य च व्यवस्था आसीदित्यनुमीयते। शक्तिवन्तोऽपि नियमान् यथावत् पालयन्ति स्म। तपोवने राजा वा साधारणजनो वा विनीतो प्रविशति स्म (पृ. ४०)। महाकविना नाटके प्रस्तुता तात्कालिकी प्रकृतिसंरक्षणसचेष्टतेयं लोभनीया वर्तते।

**प्रकृतिसंरक्षणचेतना**

नाटकारम्भे सशरो दुष्यन्तः मृगजिघांसया कण्वतपोवनं प्राप्नोति। मृगहस्त्यादिवन्यसत्त्वेषु भयमुत्पादयति च। मृगं हन्तुमुद्यतः स शरसन्धानपूर्वकं तमनुधावति (१/७)। शरपतनभयाक्रान्तो मृगस्तीव्रवेगेन धावन्नासीत्। दुष्यन्तस्तमनुसरन् सन्निकटे प्राप्य प्रहर्तुमुद्यत आसीत्। वैखानसौ सद्य आगत्य "भो भो राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः" (पृ. २७) इति उक्त्वा तमवरुन्धाते। पर्यावरणीयकाव्यसिद्धान्ते मृगयया पशुपक्षिमारणस्य विरोधः क्रियते। महाकविना कालिदासेनापि अत्र मृगव्यापादानं निषिद्धमस्ति। एतेन तदानीं पर्यावरणरक्षणे जनजागरणं वर्तमानकालादुन्नतं स्पृहणीयञ्चासीत् (निर्मल, ई. २०१७ पृ. १४४३) इत्यवगम्यते। अत्र निश्छलप्राणिनां जीवनं शस्त्रास्त्रबलसम्पन्नेन मानवेनोच्छिद्यते चेत् संसारात् सर्वेऽपि प्राणिनो विलुप्यन्ते। प्राणिनां शरीरं सुकोमलं वर्तते जीवनञ्च अतिशयचञ्चलं वर्तते। अतो मानवेन वासस्थानविदारणहिंसनादिभिः प्राणिषु तीव्रप्रहारस्त्यक्तव्य इति सन्देशः प्रकटीकृतो वर्तते। यथा -

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते॥ (१/१०)

प्रकृतौ मानवीयातिक्रमणं कार्पासपुञ्जे बह्निप्रावेशनं वर्तते। प्रकृतिः सुकोमला मानवीयातिक्रमणं प्रति अतीव संवेदनशीला च वर्तते। मानवस्य प्रकृतिविरुद्धैः क्रियाकलापैः पारिस्थितिकतन्त्रे प्रातिकूल्यं वर्धमानं वर्तते। तन्निराशाय प्रकृतिमैत्री मानवक्रिया आवश्यकी। मानवेन प्रकृतौ विज्ञानप्रविधेः विकासस्य, औद्योगीकरणस्य च माध्यमेन अधिकाधिकतमानां वस्तूनामुत्पादनाय या क्षतिः क्रियमाणा वर्तते सा निरोद्धव्या। यथा मारीचतपोवने मुनयः प्राकृतिकवस्तूनां न्यूनातिन्यूनोपभोगेन जीवनं यापयन्ति, समकालिकैर्जनैरपि तथैव विधातव्यम्। मारीचतपोभुवि साधारणतपस्विभिस्तपःसाध्यानि सुखसाधनानि स्वतः समुपलब्धानि सन्ति, तत्र कल्पितफलदाता कल्पवृक्षः, रत्ननिर्मितगृहाणि, देवसुन्दर्यश्च सुखभोग्याः सुलभाश्च सन्ति (७/१२), किन्तु मारीचस्तदन्तेवासिनश्च कल्पवृक्षात् मिष्टान्नानि फलानि च नैवोपभुज्य वायुभक्षणेन जीवितुं प्रयतमाना वर्तन्ते, स्वर्णकमलपरागाक्तैः पीतवर्णकैर्जलैः स्नान्ति, देवाङ्गनाङ्गलावण्यपानं हित्वा संयमेनावस्थातुं यतन्ते, रत्नशिलोपरिष्टात् रत्नप्रस्तरनिर्मितगृहेषु ध्यायन्ति, अन्ये मुनयस्तपोबलेन यानि वस्तूनि प्राप्तुकामास्तपन्ति तान्यत्र सुलभानि तथाप्येते तपोनिरता वर्तन्ते इति वर्णयित्वा मानवैः प्राकृतिकस्रोतसामुपयोगः जीवनाय कीयतदावश्यकमस्ति ? तावदेव कर्तव्यम्, बहुमूल्यानि खनिजानि, प्राकृतिकस्रोतांसि, वनौषधयः, वन्यजन्तवश्चेत्यादीनामधिकाधिकदोहनं न करणीयम्। यानि वस्तूनि जीवनाय अत्यावश्यकानि, तान्येव मितव्ययितां धारयित्वा न्यूनादपिन्यूनमात्रायां भोक्तव्यानीति सन्देश उपलभ्यते (राज, ई. २०१८, पृ. १६५५)। समकालिकं सततविकासाभियानम् (सस्टेनेबल डेभ्लभ्मेन्ट क्याम्पियन इति) अपि तथ्यमिदं

मुखरीकुर्वद् वर्तते।

**प्रकृतिं नारीं च प्रति पुरुषदृष्टिः**

पर्यावरणीयनारीवादसिद्धान्ते पितृसत्तात्मकसमाजस्य मान्यताभिर्विश्वासैरपि प्रकृतिनार्यौ च पीडिते स्त इति मन्यते। पितृसत्तायाश्चिन्तनं प्रकृतिं नारीं च अधीनस्थां विदधाति, तां पीडयति, भोग्याञ्च मनुते, नार्याः कर्माणि, ज्ञानम्, स्थितिञ्च न्यूनं दर्शयतीति पर्यावरणीयनारीवादस्य मान्यता वर्तते। नाटके नायकः दुष्यन्तः शकुन्तलायाः रूपं पुरुषोपभोग्यं मन्यते (२/११)। तस्य दृष्टौ यथा पुष्पम्, किसलयः, रत्नम्, मधु चेति प्राकृतिकवस्तूनि मानवीयोपभोगाय सन्ति, तथा सर्वाङ्गसुन्दरशरीरलावण्यलसितायाः शकुन्तलायाः रूपमपि भोग्यं वर्तते। नाटके कविनिबद्धवक्तृप्रौढोक्त्या शकुन्तलायाः सौन्दर्योपभोक्ता यो भविष्यति, स पुण्यात्मा बहुभाग्यवान् इति निर्दिश्य नारी पुरूषैर्भोग्या दर्शिता वर्तते। पञ्चमाङ्के गौतम्यादिभिर्राजसदने नीतां शकुन्तलां परिणीतपूर्वां विस्मृत्य संशयापन्नः स "न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम्" (५/२०) इत्युक्त्वा तां पुनरपि भोग्यामेव निर्दिशति। एतेन नाटके पितृसत्ता प्रकृतिं नारीं च भोग्यां मनुते इति पर्यावरणीयनारीवादस्य मान्यता स्फुटा लभ्यते। गान्धर्वेण विधिना परिणीय पूर्वमनास्वादितरसं नवमधुतुल्यं शकुन्तलायाः शरीरलावण्यं पेपीय राजप्रासादं नेतुं राजपुरुषं प्रेषयामीति समाश्वस्य नगरं प्राप्तो दुष्यन्तस्तां विस्मरति। गौतम्या सह राजभवनं प्राप्तामपि तामस्वीकृत्य तटतरुपातयन्ती कुलङ्कषा नदी स्वच्छं जलमपि यथा मलिनं करोति तथा त्वमपि मां दूषयसीत्याक्षिपति (५/२२)। शकुन्तला संयोगकालिकान् प्रेमप्रसङ्गान् वर्णयित्वा परिणयवार्तां स्मारयितुं प्रयतते किन्तु दुष्यन्तः किमपि न स्मरति विश्वसिति च। "स्वैरं विहरन्ती त्वं परभृतवृत्तिमाचरन्ती कस्यचिद्गर्भं नीत्वा मत्सकासमागतासि, एतादृशं पटुत्वं मानवेतरस्त्रीषु प्राप्यते चेत् त्वं तु ज्ञानवती मानुषी स्त्री वर्तसे" इति कथयित्वा स प्रकृत्यामवस्थितासु सर्वासु स्त्रीजातिषु मिथ्यावचनबाणं प्रहरति (५/२३)। तच्छ्रुत्वा शकुन्तला भ्रमरवृत्तिमता दुष्यन्तेन समाक्षिप्तस्य मित्थ्यारोपस्य इत्थं प्रतिरोधं करोति -

> यूयमेव प्रमाणं जानीथ धर्मस्थितिञ्च लोकस्य।
> लज्जाविनिर्जिता जानन्ति न किमपि महिलाः॥ (५/२६) इति।

मृगमारणोद्यतस्य, हस्तितर्जनेन तपोवनविघ्नकारकस्य, शकुन्तलाया वृक्षसेचने नियोजके कण्वमुनौ असाधुदर्शित्वारोपकस्य च दुष्यन्तस्य सर्वाः क्रियाः प्रकृतिसंरक्षणप्रतिकूलाः सन्ति। शकुन्तलाप्रेमाङ्कुरणात् पूर्वं स न स्वेच्छया, अपितु मुनेर्भयात् तपोवननियमान् परिपालयति। इत्थं दुष्यन्तं तपोवनविघ्नकारकं हिंस्रकं वृक्षस्नेहरहितं स्त्रीषु भ्रमरवृत्तिमाचरन्तं च प्रदर्श्य प्रकृत्या सहैव स्त्रियश्च पुरुषैः पीड्यमानाः सन्तीति पर्यावरणीयनारीवादस्य मान्यता नाटके प्रकटिता वर्तन्ते।

**नार्यः प्रकृतिसंरक्षिकाः**

नार्यः प्रकृतिमवगच्छन्ति। ताः सन्ततीर्जनयन्ति, ताः पालयन्ति, पोषयन्ति, वर्धयन्ति, रक्षन्ति च। तथैव जीवानां वनस्पतीनाञ्च जन्म, वृद्धिम्, परिचर्याञ्च निकटतोऽनुभवितुं शक्नुवन्ति। स्वार्थवशः पुरुषः स्वसुखहेतोः प्रकृतिं बलात्करोति। नाटकस्य नायिका शकुन्तला मृगं हन्तुमुद्यतं दुष्यन्तं स्वकीयशरीरलावण्यलीलया निवर्तयति। वृक्षमभिसिञ्चन्तीं शकुन्तलां दृष्ट्वा दुष्यन्तस्तां तत्कार्ये नियोजनमृषेर्निर्विवेकित्वमस्तीति मन्यते। शकुन्तला तातनियोगादपि वृक्षेषु स्वकीयं सहोदरस्नेहं निर्बहणाय तेषामालवालानि पूरयन्ती अस्मीति कथयति। यथा -

एका - हला शकुन्तले त्वतोऽपि तात कण्वस्य आश्रमवृक्षाः प्रियतरा इति तर्कयामि येन

नवमालिकाकुसुमपरिपेलवाऽपि त्वम् एतेषामालवालपरिपूरणे नियुक्ता।

शकुन्तला- हला अनसूये न केवलं तातस्य नियोगः ममापि एतेषु सहोदरस्नेहः। यतो भगिनी मे भवति ततः किमिति न सिञ्चामि (पृ. ५९) ? इति।

सा माधवीलतां भगिनीं मनुते, तां स्नेहातिशयेन सिञ्चति च (पृ. ५९)। मत्तभृङ्गेण भृशं पीडिताऽपि वृक्षसेचनं न जहाति। दुष्यन्तस्तु तपोवनस्थसत्त्वघातको वर्तते। यथा - "भो तपस्विनः तपोवनसन्निहितसत्त्वरक्षणाय सज्जीभवन्तु भवन्तः, प्रत्यासन्नः किल मृगयाविहारी राजा दुष्यन्तः" (पृ. ९२) इति। स वन्यजन्तूनां प्राणापहरणैर्निजं मनः प्रसादयति। शकुन्तला तु तपोवन्यान् सत्त्वान् पोषयति चिकित्सति च (४/१६)। एवं प्रकारेण नाटके नायिका शकुन्तला आर्तानां अनाथानाञ्च वन्यजन्तूनां रक्षिका वर्तते परन्तु नायकः स्वैरं विहरतां वन्यसत्त्वानां तर्जनैः विकलावयवान् विक्षुब्धांश्च कारयति। दुष्यन्तस्य रथदर्शनेन सन्त्रस्तो हस्ती वृक्षे दन्ताघातेन दन्तैकं विदारयति, लताजालं खण्डीकरोति, मृगसमूहान् प्रकीर्णान् विदधाति, तपोवननिवासिनां कन्यकानां मुनीनां तापसतापसीनाञ्च तपसि विघ्नमुत्पादयति (१/३५)। समप्रधाने तपोवने मृगयाविहाराय प्राप्तेन राज्ञा दुष्यन्तेन शान्ताः पशवस्तर्जिताः सन्ति। शकुन्तला तु तपोवनान्निर्गमनकाले माधवीलतामालिङ्ग्य सौहार्दमभिव्यनक्ति, वृक्षसेकं विना जलं न पिबति, मण्डनप्रिया सा वृक्षस्नेहार्द्रहृदया पल्लवेन केशसज्जां न रचयति, वृक्षेषु प्रथमपुष्पोद्गमे सोत्साहमुत्सवञ्च रचयति। यथा -

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।
आदौ वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥ (४/११) इति।

शकुन्तलायाः प्रेममग्नो दुष्यन्तः वन्यजन्तूनां मारणाय नोत्सहते, सेनापत्यादिभिर्मृगयां प्रति उत्साहयन् मृगया धनुभृतां चले लक्ष्ये शरप्रहरणाभ्यासं कारयति, तया शरीरमपि कृशोदरयुतं लघु स्फुर्तिमत् च भवति, अन्यतो दुर्लभो मनोविनोदः इतः प्राप्यते (२/५) इति कथयति। तच्छुत्वा विदूषकः सेनाध्यक्षाय "दास्याः पुत्रः अटवीतः अटवीमाहिण्यमानः यावत् शृगाललोलुपस्य कस्यापि जीर्णऋक्षस्य मुखे निपतितो भव" (पृ. ११९) इति गालिं ददाति। राजा दुष्यन्तश्च मृगयायै नोत्सहते प्रत्युत सैनिकान् तपोवनात् दूरे स्थापयितुमादिशति। पूर्वं हिंस्रः स हृदये शकुन्तलाप्रेमाङ्कुरणात् मृगमारणाय नेच्छति (२/३)। पर्यावरणसंरक्षिकास्त्रियः स्वसन्निधौ समागतान् हिंस्रानपि सदयान् सम्पादयन्ति। अत एवात्र पूर्वं मृगयानिरतो राजा मुनिकन्याप्रभावेन पशूनां स्वाभाविकक्रियासु रममाणो वर्तते -

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विश्रब्धैः क्रियतां बराहपतिभिर्मुस्ताक्षतिः पल्लवे
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः॥ (२/६)

सेनापतिस्तं मृगयायै प्रेरयति किन्तु स हरिणनयनेषु शकुन्तलायाः नयनछायां पश्यति। मुनिजनप्रभावेन तपोवनविघ्नं परित्यजतस्तस्य प्रकृतिरक्षाविरुद्धा चेतना हृदयात् निर्गच्छति। अत एव स तपोवनाभोगे महिषानाम्,

मृगयूथानाम्, शूकराणाञ्च निर्भयं कामाचारं स्यादिति कामयते। इत्थं नाटके नार्यः प्रकृतिकोमलाः भवन्ति, ते प्रकृतिं प्रति हार्दभावमपरिमितस्नेहं संरक्षन्तीति निरूपितमुपलभ्यते।

**संरक्षिता प्रकृतिर्मानवोपकारिणी**

'अभिज्ञानशाकुन्तले' प्रकृतिमानवयोरभेद्यसम्बन्धः प्रदर्शितो वर्तते। प्रकृत्यां विनष्टायां सत्यां मानवोऽपि न स्थास्यति। प्रकृतौ यत् पारिस्थितिकीतन्त्रं वर्तते तस्यावयवरूपेणावस्थितस्य मानवस्य जीवनम्, सुखम्, सुविधाश्च प्रकृतेः स्वच्छतायाम्, स्वाभाविकस्थितौ सम्भवन्ति । प्रदूषिता प्रकृतिर्जनेभ्यो रोगान् विघ्नांश्च सर्जति, चयापचयसम्बन्धेन जीवनस्य वृद्धौ, सृष्टौ, निर्मितिसंरक्षणे च उपकुरुते। तथ्यमेतत् नाटके च वृक्षेषु संवेदनायाः दानशीलतायाश्चारोपेण यथा प्रकाशितमुपलभ्यते -

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचिद्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै
र्दत्तान्याभरणानि नः किसलयच्छायापरिस्पर्द्धिभिः ॥ (४/७) इति।

हस्तिनापुरं प्रति तपोवनान्निर्गच्छन्त्यै शकुन्तलायै परिधापनीययानि वस्त्राभरणादीनि अदुरिति वर्णितमस्ति। तस्मात् वृक्षेषु चेतना दानशीलता च समारोपिता वर्तते। शकुन्तलया पूर्वं वृक्षाः अभिषिच्य परिवर्धिताः आसन्। तेषु शकुन्तलायाः सहोदरस्नेहश्चासीत्। मण्डनप्रियाऽपि सा स्नेहातिशयेन वृक्षेभ्यः कुसुमानि नावचिनोति स्म। वृक्षेषु प्रथमवारं कुसुमोत्पत्तेः कालस्तस्या महोत्सव एव आसीत्। वृक्षेषु नायिकायाः यादृशः सहोदरस्नेहः तादृश एव स्नेहः वृक्षैः प्रकटीकृतो वर्तते। नगरीं गन्तुकामा इयम्, तत्पार्श्वे नागरिकपरिधेयानि वस्त्राभूषणादीनि सौन्दर्यप्रसाधनानि च न सन्ति, राजप्रासादे सपत्नीनामग्रतः बल्कलेनेयमुपहास्यतां नूनं गमिष्यति, पूर्वमनया वयं भृशमुपकृताः स्मः, अधुना प्रत्युपकाराय समुचितः कालः, अतोऽस्माभिस्तस्याः आवश्यकतां विज्ञाय परिधेयानि दातव्यानीति सञ्ज्ञानादिषु एतासु घटनासु वृक्षेषु चेतनोत्पत्तिः, भावात्मकता, दानशीलता चेति मानवीयाः धर्माः समारोप्य संरक्षिता प्रकृतिर्मानवेभ्यश्च आजीविकायै सहाय्यमाचरति, सा स्वच्छवातावरणफलजलान्नसाकादिकैश्च मानवानुपकुरुते इति निर्दिष्टमस्ति।

**मानवः परोपकारेणैव जीवश्रेष्ठो भविता**

ज्ञानविवेकबुद्धिभिर्युक्तत्वाच्च मानवो जीवश्रेष्ठो मन्यते । अतो निःस्वार्थेभ्यः पशुपक्ष्यादिप्राणिभ्यः, वनस्पतिभ्यः, पर्वतनदीभूवाय्वाकाशादिभ्यश्च जीवाजीवप्राकृतिकपदार्थेभ्यो निर्विवेकाचारः, अधिकारोच्छेदः, अत्याचारः, कामाचारश्च तस्मै न शोभते। विज्ञानप्रविधेः शस्त्रास्त्रयोश्च निर्माणेन मानवः विश्वस्मिन् विश्वे सर्वशक्तिमान् जातोऽस्ति । शक्तिमति संयमस्य महती आवश्यकता भवति । अमुमेव तथ्यं नाटके वैखानसदुष्यन्तसंवादे प्रस्तुतमुपलभ्यते । मृगयायै वनं प्राप्य पुरो दृश्यमानं मृगं हन्तुमुद्यतः दुष्यन्तस्तमनुगच्छन् कण्वस्यान्तेवासिभ्यां वैखानसाभ्यां सह सम्मितलि। वैखानसौ तक्षणमेव बाणं प्रतिसंहर्तुं राजानमादिशतः (१/११)। तौ तं विनयितुं प्रयतेते । तस्मिन्नेवोपक्रमे शस्त्रं आर्त्तत्राणाय निर्मितो वर्तते, निरपराधिने प्रहाराय न वर्तते (१/११)। वनं वनं परिभ्रमन् मृगः कदापि कस्मैचित् भयं नोत्पादयति, अतस्तस्मिन् बलप्रयोगः शक्तेर्दुरुपयोगो वर्तते । इदानीं पर्यावरणे यावन्त्यः समस्याः समापतिताः सन्ति, ताः सर्वा मानवीयोपद्रवोत्पन्नाः सन्ति। तस्मादपि पर्यावरणं रक्षितुं केवलं मानव एव

प्रभवति । सजीवो भवेदथवा निर्जीवो भवेद्, पृथिव्यामवस्थितानां सर्वेषां संरक्षणमेव जीवश्रेष्ठस्य मानवस्य परमकर्तव्यमस्ति। अत एव नाटकस्य पञ्चमाङ्के कष्टमनुभवन् वृक्षः स्वकीयाश्रये समागतानां तापं परिहरति (५/६) इत्युल्लिख्य प्रकृतिसंरक्षणेन पर्यावरणसमस्यायाः समाधानाय मानवाः प्रेरिताः सन्ति । मानवो ज्ञाने, प्रविधौ, चेतनायाञ्च प्राणिषु श्रेष्ठो वर्तते। निर्विवेकिनो प्राकृतिकपदार्थाश्च परोपकारनिरताः वर्तन्ते चेत् मानवीयं कर्तव्यमपि तेनावश्यमेव पूरणीयं भवति। यथा -

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ।। (५/१३) इति।

तरवो मेघाश्च यथा फलोद्गमेन नवजलागमेन च नम्राः भवन्ति तथैव विज्ञानप्रविधिशस्त्रास्त्रशक्त्यामता मानवेनाऽपि प्राकृतिकवस्तुषु सहास्तित्वं धारणीयम् । "धनवती गुणवती च प्रकृतिः परोपकारं कुर्वन्ती वर्तते । मानवेनाऽपि पर्यावरणं संरक्षणीयमिति चेतनां गृहीत्वा स्वार्थवृत्तिर्हातव्या, परोपकाराय च यतनीयम्" (राज, ई. २०१८, पृ. १६५२) । तदा तद्विवेकं जीवश्रेष्ठस्य मानवस्य परमकर्तव्यं मानवेतरप्राणिनामुपकरणं वर्तते इति नाटकीयसन्देशः साम्प्रतीकसमये पर्यावरणसंरक्षणे मानवान् सदा प्रेरयति, चराचरप्रकृतेः संरक्षणकर्मणि दायित्वञ्च बोधयति।

**प्रवर्ततां प्रकृतिहिताय पार्थिवः**

भुवं प्राप्ता विनाशकारिणी परावैजनी सूर्यरश्मिः, जलवायुपरिवर्तनेन मेरुप्रादेशिकतुहिनद्रवीभावः, हिमनद्याः शुष्कता, वायुप्रदूषणञ्चेत्यादयः पर्यावरणीयाऽसन्तुलनजन्याः साम्प्रतिकसमस्याः मानवस्य क्षणिकसुखलिप्सातो जयमानाः सन्ति। विज्ञानप्रविधेः विकासस्य नाम्ना अनुकूलां प्रकृतिं विक्षुब्धां कृत्वा जनः पूर्वं मिलितुमिच्छन्तीमग्रे स्थितां प्रियां परित्यज्य चित्रे लिखितां स्निह्यमानः दुष्यन्त इव पश्चात्तापाग्नौ दन्दह्यमानो दृश्यते -

साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहुमन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् ।। (५/६) इति।

गौतमीप्रभृतिभिः कण्वाश्रमनिवासिभिर्राजसदने नीत्वा इयं तव भार्या वर्तते स्वीकुरु इत्युक्त्वा बहुभिरुपायैः स्मारितोऽपि नायकः दुष्यन्तः पूर्वं तां न स्वीकरोति । पश्चात् धीवरसकासाद् प्राप्तमङ्गुलीयकं दृष्ट्वा सा मया परिणीतपूर्वा इति स्मृतिं लब्ध्वा सचिन्तो वर्तते। सेविकया चित्रफलके लिखितं शकुन्तलाचित्रं पश्यन् यथेष्टजलभरितां नदीं परित्यज्य मृगतृष्णिकया पिपासां शान्तयितुं यतमानोऽस्मीति च निगदति । दुष्यन्तस्य एतस्मिन् कथने साम्प्रतिकमानवसमुदायस्य स्थितिरभिव्यक्ता वर्तते । अधुना मानवः जीवनानुकूलां प्रकृतिं परिहेल्य सुखसुविधोपभोगलौल्यात् ततोऽपि विकटे दुःखगर्ते निपतितो वर्तते। औद्योगिकविकासेन बहूनां वस्तूनामुत्पादनं कृत्वा विक्रीय जनेभ्यः सुखसाधनानि व्यवसायं च प्रदाय सुखाधिक्ये नेतुं शासकैर्यः प्रयासः कृतः स क्षणिक आसीत् । आर्थिकाभिवृद्धौ आधारिता या वाणिज्यनीतिः शासकैरवलम्बिता वर्तते सा सततमग्रे न गच्छति। प्राकृतिकस्रोतसां सीमा वर्तते। प्रकृतेर्दोहनातिशयेन लाभतोऽपि विपुला क्षतिर्जायमाना वर्तते। एतेन वर्तमानकाले क्षणिकसुखलिप्सया मानवः पश्चात्तापे दह्यमानो वर्तते । राजा दुष्यन्तो नाटके "अहो धिक् कथमपराद्धस्तपस्विनामस्मि" (पृ. ९६)

इत्युक्त्वा यथा रथदर्शनतर्जितेन हस्तिना तपोवने कृतमुपद्रवं विलोक्य पश्चात्तापमनुभूय "आश्रमबाधा यथा न भवति, तथाहमपि यतिष्ये" (पृ. ९७) इत्यादिना आश्रमबाधां निवर्तयामीति सङ्कल्पमपि करोति तथा साम्प्रतिकमानवसमुदायेनापि प्रकृतिरक्षणाय दृढसङ्कल्पः करणीयः। तदेव भरतवाक्येऽपि भणितमस्ति- प्रवर्ततां प्रकृतिहिताय पार्थिवः (७/३५) इति । प्रकृतीनां (प्रजानाम्) सुदीर्घकालिकं हितं प्रकृतेः (पर्यावरणस्य) संरक्षणसंवर्धनादिना सततहितसाधनेनैव भवतीति हेतोः दुष्यन्तमुखात् इदानीमपि कविः प्रकृतिरक्षणं शिक्षते वा -

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी,
पादास्तामभितो निषण्णचमरा गौरीगुरोः पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निमातुमिच्छाम्यधः,
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥ (६/१९) इति।

कल्पकल्पान्तरेष्वपि नद्यः स्वच्छजलाः भवेयुः तत्र जलचराः, हंसाश्च स्वैरं विहरन्तः जीवनं नयेयुः। पर्वताः शष्पभरिता मृगनिवासोचिताः स्युः, वन्यप्रान्तस्थेषु वृक्षतलेषु निर्भयाः हरिणादयः प्राणिनो यथेच्छं क्रीडेयुः प्रकृतेरेतादृशी स्थितिर्निर्मीयते चेत् सर्वतः प्रकृतिहितं भवति। अतो शासकैः पर्यावरणानुकूल्येन भौतिकविकासं परिकल्प्य प्रकृतिहिताय प्रयतनीयम्।

## निष्कर्षः

'अभिज्ञानशाकुन्तल'नाटके प्रकृतेर्मानवीकरणेन मानवस्य प्रकृतीकरणेन च प्रकृतिमानवयोर्गभीरसम्बन्धो दर्शितो वर्तते। आलम्बनीकृत्य, उद्दीपनीकृत्य, उपमानीकृत्य, वस्तुसङ्केतरूपेण च वर्णिता प्रकृतिरत्र जनमनांसि विमोहयति। महाकविना प्रकृतेर्जडपदार्थेषु वनस्पतिपशुपक्ष्यादिचेतनेषु च मानवीयां शारीरिकीं वृत्तिं मानसिकीं स्थितिञ्चारोप्य सर्वभूतेष्वात्मवद्दर्शनाय मानवाः प्रेरिताः सन्ति। लता-वृक्ष-पशु-पक्षि-जल-मृत्-पाषाण-वाय्वादिषु चेतनाचेतनेषु जीवदर्शनं मानववद्व्यवहारश्च तेषां संरक्षणकर्मणि मानवानुत्कयति।

नागरिकेषु मानवारोपितोद्यानस्थप्रकृतितः स्वतःसम्भवा वनप्रान्तस्था प्रकृतिर्बहुगुणवती दर्शिता वर्तते। तपोवनाभोगस्थां सुरम्यां सुमधुरां शान्तां च प्रकृतिं वर्णयित्वा तात्कालिकभारतवर्षीयभुवि सघनैर्विस्तीर्णैश्च महारण्यैर्व्याप्ता आर्यसभ्यतासंरक्षिता विशाला वनसम्पदा अवर्तत। ऋषयः, मुनयः, तपस्विनश्च वन्यप्रदेश एव ऋषिकुलानि गुरुकुलानि च संस्थाप्य वनप्रदेशं साधनास्थलीं जीवनविश्रान्तिभूमिञ्च कारयन्ति स्म, वृक्षलतापशुपक्ष्यादिषु उच्चस्तरीयां संरक्षणचेतनां धारयन्ति स्म। सर्वशक्तिवन्तश्चक्रवर्तिनो नृपाश्च पर्यावरणहितकरेषु तपोवननियमेषु सावधाना भवन्ति स्म। आश्रमेषु बहुमूल्यानि खनिजानि, प्राकृतिकस्रोतांसि, वनौषधयश्च सुलभाः आसन् किन्तु मुनिजनेषु तद्भोगलिप्सा नासीत्। मितव्ययिनस्ते जीवनाय यदावश्यकं तदेवोपभुञ्जन्ते स्म। तात्कालिकोऽयं पर्यावरणसंरक्षणाऽऽदर्शभरितो लोकव्यवहारोऽधुनाऽपि नजैरवलम्बनीयो वर्तते।

नाटके प्रकृतिं नारीञ्च च प्रति स्वार्थप्रेरिता, इयं परिभोग्या इति विचारारूढा पुरुषदृष्टिः प्रकटिता वर्तते। भोगसाधनीकृत्य विहितायाः प्रताडनायाः स्त्रीजनप्रतिरोधश्च लभ्यते। नाटके मृगयाशक्तो नायकः दुष्यन्तः मृगमारणायोत्सहते, वनगजं तर्जयित्वा तपोवनहरिणेभ्यः तापसेभ्यः भीतिमुत्पादयति, लताश्चोत्पाटयितुं प्रेरयति। कण्वाश्रमं प्राप्य च मुनिभयादेव तपोवनमृगवृक्षवनस्पतीनां संरक्षणे स्वकीयां प्रवृत्तिं नाटयति। सर्वाङ्गसुन्दरीं शकुन्तलां वृक्षमभिषिञ्चन्तीं विलोक्य कण्वमुनौ असाधुदर्शित्वञ्च आक्षिपति। शकुन्तला तु लतावृक्षपशुपक्षादिप्

राकृतिकोपकरणेषु सहोदरस्नेहं संरक्षति। सा प्रेमाकर्षणेन हिंस्रं दुष्यन्तमपि मृगयाविरक्तं सम्पादयति। एतेन वर्णनेन नार्यो यथा प्रकृतिं स्निह्यन्ति पुरुषास्तथा नेति पर्यावरणीयनारीवादस्य मान्यता प्रकटीकृता वर्तते। नाटके नायिकया शकुन्तलया पल्लवानि अच्छिद्य, लतावृक्षादिषु जलसेकेन, आद्ये कुसुमप्रसवे हर्षातिरेकेण, आहतमनाथञ्च मृगशावकमौषधचिकित्सया सनाथीकृत्य, आसन्नप्रसवाया मृगवध्वाः सुखप्रसवचिन्तया च संरक्षिता प्रकृतिरपि शकुन्तलायै वस्त्राभूषणानि सौन्दर्यप्रसाधनानि च ददति। एतेन संरक्षिता प्रकृतिरपि मानवीयामावश्यकतां पूरयतीति सन्देशोपलभ्यते।

मानव इतरप्राणिभ्यः ज्ञाने, प्रविधौ, चेतनायाञ्च श्रेष्ठो मन्यते। स शक्तिमान् च वर्तते। जीवश्रेष्ठेन शक्तिमता मानवेन स्वसामर्थ्यानुसारमेव संयमः धारणीयो भवति। जनेन सहास्तित्वम्, उदारता, परोपकारश्चेति धर्माः समुह्य स्वार्थवृत्तिः परिहर्तव्या। प्रकृतिसंरक्षणेनैव प्रकृतीनां (देशवासिनां) दीर्घकालिकहितरक्षा सम्भवति। तस्मात् शासकप्रशासकैः सदैव प्रकृतिहिताय सततमग्रेसरणीयम्। नद-नदी-वाय्वाकाश-वृक्ष-हरिणादीनां समेषां प्राकृतिकोपकरणानां रक्षणेन सुन्दरी, शान्ता, स्वच्छा च प्रकृतिर्निर्मीयते चेत् सर्वतः सर्वदा सर्वथा च प्रकृतिहितं सम्भवति। इत्थं महाकविना कालिदासेन 'अभिज्ञानशाकुन्तले' पर्यावरणसंरक्षणानुकूला दृष्टिः प्रस्तुता वर्तते।

**कृतज्ञताज्ञापनम्**

प्रस्तुतालेखनिर्माणे परिष्कारपरिमार्जनक्रमे येषां रचनाः, विचाराः, परामर्शाश्च उपयुक्ताः सन्ति, तेभ्यः सर्वेभ्यः गुरुजनेभ्यः सविनयं श्रद्धावनतोऽहं हार्दिकीं कृतज्ञतां व्यनज्मि।

**सन्दर्भिका**

अर्याल, अम्बिका (२०७९). *नारीवाद र नारीस्रष्टाका उपन्यास*. पैरवी बुक हाउस प्रा. लि.।

एटम, नेत्र (२०६७). पर्यावरणीय समालोचना. *रत्न बृहत् नेपाली समालोचना (सैद्धान्तिक खण्ड)* (द्वि. सं., राजेन्द्र सुवेदी र लक्ष्मणप्रसाद गौतम सम्पा.). पृ. ३१०-३३२।

कालिदासः (सन् २०११). *अभिज्ञानशाकुन्तलम्* (ज्योत्स्नासरलासंस्कृतहिन्दीव्याख्योपेतम्, सुधाकरमालवीयः, व्या.का.). चौखम्बा कृष्णदास अकादमी, वाराणसी।

क्षेत्री, ज्ञानबहादुर (२०८१ जेठ २२). पर्यावरणमाथि गरिने सिर्जना र तिनको समालोचना. *साहित्य पोष्ट*। Retrieved from https://sahityapost.com/environment-literature/39392/ Retrieved date 3/21/2025 5:41 PM.

गिरी, अमर (ई. २०२५ जनवरी ९). पर्यावरण, पर्यावरणीय दृष्टिकोण र समालोचना. *वामपन्थ*। Retrieved from https://www.bampanththeleft.com/2025/01/09/5224/ Retrieved date 3/21/2025 12:51 AM.

गौतम, कृष्ण (२०६४). उत्तर *आधुनिक जिज्ञासा*. भृकुटी एकेडेमिक पब्लिकेसन्स।

निर्मल अर्जुनकुमार (ई.२०१७). वर्तमान परिप्रेक्ष्य में कालिदास की कृतियों में पर्यावरणीय संचेतना. *Themed Section: Science and Technology (IJSRST)*. 3(8). 1442-1446. Retrieved from https://ijsrst.com/paper/4252.pdf

पाण्डेय, रंजन कुमार (ई.२०२०). अभिज्ञानशाकुन्तल में पर्यावरण चेतना. *International Journal of Advance Research and Innovative Ideas in Education*. 6 (5), 1794–99. Retrieved from https://ijariie.com/AdminUploadPdf/Abhigyaan_Shakuntala_Mein_Prayavaran_Chetana_ijariie12934.pdf?srsltid=AfmBOorN1wiD-kQ6-qOREdw5e8Paqx0FmrxgvqU_tT00RQQLpFF3F8lA

प्रजापत, कौशल किसोर (ई. २०२२). अभिज्ञानशाकुन्तलम् : पर्यावरणीय प्रसङ्गों का अध्ययन और वर्तमान उपादेयता (प्रकृति और मानव के सम्बन्धों के आलोक में ). *IJSR* 8(2), 28-33. Retrieved from https://www.anantaajournal.com/archives//2202vol8issue/2PartA/.026-8-2-8pdf

भट्टराई, रमेशप्रसाद (२०७०). *समय, सौन्दर्य, पर्यावरण र कविता*. विवेक सिर्जनशील प्रकाशन प्रा. लि. ।

वेद.*com* Retrieved from https://xn--j2b3a4c.com/rigveda/6/48/17 Retrieved date 3/21/2025 1:02 AM.

वैद्य, मोहन किरण (२०७८ वैशाख १३). मार्क्सवादी दृष्टिमा परिचय, नारीवाद र पर्यावरण. *मूलबाटो* । Retrieved from https://moolbato.com/2021/04/38634/ Retrieved date 4/8/2025 8:86 PM.

राज, पुनम (ई.२०१८). अभिज्ञानशाकुन्तलम् में पर्यावरणीय महत्व. *International Journal of Scientific Research in Science and Technology (IJSRST)*. Technoscience Academy. 4 (2), 1646–56. Retrieved from https://ijsrst.com/paper/2920.pdf

सिंह, बबिता (ई.२०२०). अष्टमूर्ति शिव में पर्यावरणीय चेतना. *International Journal of Advanced Research in Science, Communication and Technology (IJARSCT)*. 11 (1), 147-51. Retrieved from https://ijarsct.co.in/Paper596.pdf

सिंह, रामायण (ई.२०२४). कालिदासीय काव्यों में पर्यावरण-विमर्श. *IJAAS*. 6 (1). 71-78. Retrieved from https://www.allstudyjournal.com/article/1162/6-4-18-538.pdf

सोती, जगतमणि (ई. २०२४). प्रतिगन्ध उपन्यासमा पर्यावरणीय सौन्दर्य. *GS WOW: Wisdom of Worthy Research Journal*, *3*(2), 101-105. Retrieved from https://www.nepjol.info/index.php/gswow/article/view/75445

सोनकर, सुष्मिता (ई.२०१८). अभिज्ञानशाकुन्तल में पर्यावरणीय चिन्तन. *International Journal of Scientific Research in Science and Technology (IJSRST)*. Technoscience Academy. 4 (2), 1712-15. Retrieved from https://ijsrst.com/paper/.6914pdf